SUBJECT- General introduction to Dansana

General introduction to Dansana

वैशेषिकदर्शनम्

दृशिनशब्दस्य व्युत्पत्त्या ज्ञानं भवति ~~भवन्ति~~ यत् दृश्यतेऽनेन इति शब्दः दृश् धातोः करणार्थे ल्युट् प्रत्ययेन ज्ञातम्। दृश्यते इति दर्शनम्। भारते दर्शनशब्दस्य प्रयोगः स्थूलसूक्ष्मौ ~~उभयो तत्त्व दर्शनशास्त्रस्य विषयः स्तः~~। भौतिकं एव आध्यात्मिकम् अर्थेषु भवति, भारतीय दर्शनानुसारेण दर्शनस्य द्वे भागे स्तः आस्तिकनास्तिक। यानि दर्शनानि वेदानां प्रामाणिकतां ~~अङ्गी~~ अङ्गीं न कुर्वन्ति तानि नास्तिक दर्शनानि। परन्तु यानि दर्शनानि वेदानां प्रामाणिकं अङ्गीकुर्वन्ति तानि दर्शनानि आस्तिकानि दर्शनानि भवन्ति मन्यन्ते।

अधुना मया वैशेषिकदर्शनस्य विषयः आलोच्यते सरलभाषया।—

आस्तिकदर्शनेषु अन्यतमं वैशेषिकदर्शनम्। अस्य प्रवर्तकः महर्षिकणादः अस्ति। अन्यदर्शनानाम् अपेक्षा विशेषपदार्थस्य मुख्यः स्थानकरणेन एतस्य नाम वैशेषिक अभवत्। दर्शनमिदं काणादं औलुक्यं नाम्नापि अभिधीयते। एतस्य विशिष्टतायाम् एकः कथनं प्रसिद्धम् अस्ति यत्—

"कणादं पाणिनीयं च सर्वशास्त्रोपकारकम्।"

दर्शनेऽस्मिन् प्रमेयविषयैः सह आत्म- अनात्म- विचारः दृश्यते। वैशेषिकदर्शनस्य सुप्रसिद्धं भाष्यमस्ति. प्रशस्तपादकृतः — "पदार्थधर्मसंग्रहः", न्याय समन्वितं



वैशेषिकदर्शनं अर्वाचीनं मन्यते। अन्नंभट्टस्य तर्कसंग्रह लौगाक्षिभास्करस्य तर्ककौमुदी न्याय समन्विते वैशेषिक साहित्ये महत्वपूर्णा: ग्रन्था: सन्ति।
न्याय- वैशेषिकदर्शनयोर्भेद:-

१) न्यायदर्शनं प्रत्यक्ष - अनुमान - उपमान - शब्द संज्ञकानि चत्वारि प्रमाणानि मन्यते।
परन्तु वैशेषिकदर्शनं प्रत्यक्ष - अनुमानं द्वे एव प्रमाणे स्वीकरोति।

२) न्यायदर्शने षोडश- पदार्था: स्वीकृता: सन्ति, वैशेषिकदर्शनं केवलं सप्त एव पदार्था अङ्गीकृता:। यथा-

1. द्रव्य
2. गुण:
3. कर्म
4. सामान्यम
5. विशेष:
6. समवाय:
7. अभावश्च।

पदस्यार्थ: पदार्थ इति व्युत्पत्त्याभिधेयत्वं पदार्थ- सामान्य लक्षणम्, पदार्थ इति पदस्य 'तत् वस्तु' यस्य बोध: केनापि पदेन जायते। 'वैशेषिकसूत्र केवल द्रव्य- गुण- कर्म- सामान्य- विशेष- समवाय:' इत्येतान् षट् भावपदार्थान् मन्यते। अर्वाचीने वैशेषिकदर्शने 'अभाव:' इत्याख्य: सप्तम: पदार्थ: स्वीकृत:। अभावश्च चतुर्विध:- 1. प्रागभाव: 2. प्रध्वंसाभाव: 3. अत्यन्ताभाव: 4. अन्योन्याभावश्चेति।

द्रव्य:- द्रव्यत्व - जाति-मत्त्वं द्रव्यत्वम्।
तत्तु नवविध:-

(२)



1. पृथिवी
2. जलम्
3. तेजः
4. वायुः
5. आकाशः
6. कालः
7. दिक्
8. आत्मा
9. मनश्च।

गुणः — गुणं द्रव्यमाश्रितं एव तिष्ठति, कणादस्तु रूप - रस - गन्ध - स्पर्श संख्या - परिमाण - पृथकत्व - संयोग - विभाग - परत्व - अपरत्व - बुद्धि - सुख - दुःख - इच्छा - द्वेष - प्रयत्नान् सप्तदश गुणान् उल्लिखति। प्रशस्तपादौ गुरुत्व - द्रवत्व - स्नेह - संस्कार - धर्म - अधर्म - शब्दाख्यान् सप्त अप्तान्यान् गुणान् च उल्लिखति। इत्थं चतुर्विंशतिगुणाः सन्ति।

कर्म :— दीपिकाटीकायां उच्यते —
"संयोग भिन्नत्वं सति संयोगासमवायि-कारणं कर्म"
कर्म शारीरिकक्रिया इत्युच्यते। तत्तु पञ्चविधः —
1. उत्क्षेपणं
2. अवक्षेपणं
3. आकुञ्चणं
4. प्रसारणं
5. गमनञ्च।

सामान्यम् — सामान्यं नित्यमेकम् अनेकानुगतं।
सामान्यम् द्विविधं — परसामान्यं अपरसामान्यञ्चेति।

विशेषः — पदार्थौ वैशेषिकदर्शनस्य मुख्यपदार्थः। तर्कभाषायां विशेषः "नित्यो नित्यद्रव्यवृत्तिः" इत्यनेनप्रकारेण वर्णितं। भावोऽयं यत् विशेषः नाम पदार्थः परमाण्वादिषु वसति, स अन्तिमः।



समवर्तक धर्मोऽस्ति। अन्तिम ~~अन्त~~ भेदक-धर्मत्वात् स "विशेष" इत्यभिधीयते। पृथिव्यादि चतुष्टयस्य परमाणव आकाशादि पञ्चकं च नित्यद्रव्याणि।

समवाय:-

तर्कसंग्रहे समवायस्य लक्षणं —
"नित्यसम्बन्ध: समवाय:"।
संयोगसम्बन्धेऽतिव्याप्तिवारणाय नित्यति।
आकाशादौ अतिव्याप्तिवारणाय सम्बन्ध इति पदं प्रयुक्त:। ~~समवाय: अयुत सिद्ध वृत्ति।~~
सम्बन्ध: द्विविध: — संयोग: समवायश्च।
अत: अनेन भेदेन समवायस्य लक्षणं अपेक्षी कर्तुमि आह:— समवाय: अयुत सिद्धवृत्ति:।
अयुतसिद्धौ तु — "ययोर्द्वयोर्मध्ये एकम् — विनश्यदपराश्रितमेवावतिष्ठते तावयुतसिद्धौ"।
अभाव:— पदार्थैषै समम: पदार्थ: अभाव:।
भावभिन्नत्वं अभावत्वम्। अभावश्च चतुर्विध:-
क) प्रागभाव: ख) ध्वंसाभाव: ग) अत्यन्ताभाव: घ) अन्योन्याभावश्चेति।

— ० —